National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 130-132
© 2025 NJHSR
www.sanskritarticle.com

डॉ. हृषिकेशसाहुः
सहायक-प्राध्यापकः,
ज्योतिषविभागः,
कविकुलगुरु-कालिदास-संस्कृत
विश्वविद्यालयः रामटेकम्

Correspondence:
डॉ. हृषिकेशसाहुः
सहायक-प्राध्यापकः,
ज्योतिषविभागः,
कविकुलगुरु-कालिदास-संस्कृत
विश्वविद्यालयः रामटेकम्

# वैदिकवाङ्मये पर्यावरणस्थितिः

डॉ. हृषिकेशसाहुः

विश्ववाङ्मयाधारभूतः, ज्ञानविज्ञानाध्यात्मरत्नाकरः, धर्माणां धर्मः कर्मणां कर्मेति, धर्मार्थकाम-मोक्षोपदेशकः, जगतितलेसुखसमृद्धिषान्तिप्रेरकः, एकैव मानुषीजातिरित्यस्यो-द्घोषकः, सर्वे भवन्तु सुखिनः प्रभृतीनां मुद्बोधकोवेदो ब्रह्मवदनाद्यनन्तोस्ति। अक्षरशब्द-मयोयं वेदः विश्ववाङ्मयेषूत्कृष्ट-तमसागरोस्ति। अस्मिन् वेदे समाजस्य धार्मिकभावनाः आध्यात्मिकविचारधाराश्च समाहिताः सन्ति। वस्तुतोयं वेदः सृष्टेरारम्भादेव भारतीयानां जीवनधारास्रोतः निरन्तरं इदानीं पर्यन्तं प्रवहदस्ति। ईश्वरसमोयं वेदः भारतीयानामाध्यात्मिकं जीवनं तथा तस्य सांस्कृतिकविकासस्याध्ययनार्थं कोषग्रन्थो विद्यते। वेदानामध्ययनं एवं तज्ज्ञानरसास्वादनं बिना जीवनं व्यर्थमस्ति। न केवलं वेदाः मानवकल्याणार्थं समाद्रिताः परञ्च मनुना इमे पितृदेवमनुष्याणां सनातनचक्षूरूपेणाभिहिताः। यथा -
पितृदेव मनुष्याणां वेदष्वक्षुः सनातनम्।

अतः कथितुम् शक्यते यत् सत्तात्मकोयंवेदः न केवलं भारतस्य, अपितु वेदानां उपादेयता जगद्विश्रुतास्ति। सम्पूर्ण ब्रह्माण्डे ज्ञानविज्ञानाध्यात्मसन्दर्भ वेदानां प्रासङ्गिकता सार्वभौमिकी सार्वकालिकी चस्तः। शब्दमयोयं वेदः यथा - एकः एव ईश्वरः सम्पूर्णाषु सृष्टिषु व्याप्तः तथैव पद्यगद्यगानकारणात् चतुषु दृग्यजुः सामाथर्वनाम्नाख्याताः। एवमेव ब्राह्मणार-ण्यकोपनिषद्ग्रन्थान् संधाय च षडङ्गोवेदः धर्ममयः निष्कारणः ब्राह्मणेनाध्येयोज्ञेयश्च यथा "ब्राह्मणेन निष्कारणो धर्मः षडङ्गोवेदोध्येयोज्ञेयश्च।" पातञ्जलमहाभाष्येपस्पषानिकान्तर्गतं। शब्दमयोयं वेदः ईश्वरवाङ्मयमुच्यते। वाक्छब्दः विद्याधिष्ठात्र्याः देव्याः सरस्वत्या यद्यपि वाचकोस्ति, तथापि वाक्छब्दः शब्द-पर्यायत्वेनस्वीकृत्य कालिदासेन रघुवंशारम्भे वागर्थाविव-सम्पृक्तौ, भर्तृहरिणा अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरं, अक्षरं ब्रह्मपरमं स्वभावोध्यात्म-मुच्यते इति गीता तथा सिद्धे शब्दार्थ सम्बन्धे इति वार्तिकं पतञ्जलिना लिखित्वा शब्दार्थानां अक्षराणां च नित्यत्वं स्वीकुर्वन्तः आचार्यैः स्वस्वमतं व्यक्तीकृतम्। मम् षोधपत्रस्य विषयः ऋग्वेदेपर्यावरणमहत्वमस्ति। अतः सर्वप्रथमं वेद शब्दस्य व्युत्पत्तिः मया करणीया। यथा- विद् ज्ञाने अदादिः, विद् सत्तायाम् दिवादिः, विद् लृ लाभे तुदादिः, विद् विचारणे रूधादिः, इत्येतेभ्यः विभिन्नगणेभ्यः पठतेभ्यः धातुभ्यः घञ् प्रत्ययेन वेदशब्दस्य, निष्पत्तिर्भवति। अतः वेदशब्दः ज्ञानात्मकः, सत्तात्मकः, लाभात्मकः, विचारात्मकश्चेति चतुर्णामर्थानां वाचकोस्ति। एतदतिरिक्तं वेदशब्दस्य धर्मोप्यर्थोभवति। यतोहि - महामुनिना पतञ्जलिना पस्पषाहनिके लिखितम् यथा-

"ब्राह्मणेननिष्कारणोधर्मः षडङ्गोवेदोध्येयोज्ञेयश्च" अनेन ज्ञायते यत् मनोजातैः द्विजैमानवैः निष्कारणः धर्मः षडङ्गोवेदोध्येतव्यः ज्ञातव्यश्चेति। यथायत्- पूर्व मयाख्यातं यत् वेदाः मानवानां कल्याणार्थमेव सन्ति। अतः वेदे एकमप्यक्षरं इदृङ्नास्ति यत् मनुष्याणां कल्याणाथरं न भवेत्। वेदे सर्वत्र ऋषयः देवस्तुतीः कुर्वन्ति। अनेन ज्ञायते यत् अस्माभिः सर्वैः मनुष्यैः प्रतिदिनं देवस्तुतिः कार्या। इदमस्माकं कर्तव्यमस्ति। "यद्यदाचरति श्रेष्ठस्तत्तदेवे-तरोजनः" इति गीतानुसारं अस्माभिः सर्वैः यथा ऋषयः निरन्तरं वेदेषु प्रतिदिनं देवाराधनं कुर्वन्तिस्म तथैवास्माभिरपिकर्तव्यः। यथा ऋग्वेदस्य प्रथममण्डलस्य प्रथमसूक्तस्य प्रथमे मन्त्रे ऋषि विष्वामित्रः तेजः स्वरूपं यज्ञस्य पुरोहितं दानादि दिव्यगुणसम्पन्नं हत्वनुसारं यज्ञकर्तारं दानादानमयं रत्नानां धातमं अग्निमीडे इति मन्त्रार्थे अग्निं सर्वस्वं मत्वास्तवनं करोति।

यथा - अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारम् रत्नधातमम् ।।

यथा मया पूर्वमेवाख्यातं यत् मम शोधपत्रस्य विषयः ग्वेदेपर्यावरणमहत्वमस्ति। अतः वेद शब्द व्युत्पत्यनन्तरं पर्यावरणशब्दे विचारः आवश्यकोस्ति। इदानीं वसुधातले वह्वाः समस्याः ताडकाराक्षसी इव मुखं प्रसार्य जीवजन्तुमनुष्यान्श्च भक्षितुं विश्वस्य समक्षे उपस्थिताः सन्ति। यथा जनसङ्ख्यावृद्धिः, बुभुक्षा, पिपासा, अशिक्षा, धर्मान्धिता, आतंकवादः, परमाण्वस्त्रविकास्पर्धा, पर्यावरणं चेति। उपुर्यक्तासु समस्यासु प्रबलतमा पर्यावरणसमस्या विश्वस्य समक्षे इदानीं अस्माभिः सर्वैरनुभूयते। अतः पर्यावरणोपरि सर्वप्रथमं विचारः करणीयः स्यात्। परिआङ् उपसर्ग पूर्वकं " वृञ् आवरणे चुरादिः, वृ वरणे भ्वादिः" इत्येताभ्याम् उभयगणपठित-धातुभ्याम् करणे कृते ल्युटि प्रत्यये पर्यावरणशब्दस्य निष्पत्तिर्भवति। अनेन प्रकारेण प्रकृतिप्रत्ययानुसारं परितः मर्यादापूर्वकं पर्यावरणशब्दः आवरणस्य द्योतकोस्ति। यथा यत् वयं जानीमः एकः एव शब्दः प्रकरणानुसारं विषयानुसारं चापि विभिन्नार्थ-प्रकाशकोभवति। एवमेव पर्यावरणशब्दोत्र न केवलं उपर्युक्तार्थस्यैव वाचकः अपितु वैज्ञानिकाध्यात्मिकदृष्ट्या ब्रह्माण्डान्तरवर्ति-समस्तदृश्यादृश्यस्थावरजङ्गमानां पदार्थानां वाचकः एकः परिभाषिकः शब्दोनुभूयते। पर्यावरणस्यास्य संरक्षणे आध्यात्मिकदृष्ट्या वेदब्राह्मणारणयको-पनिषदर्शनवेदाङ्गादयः वैदिकवाङ्मयग्रन्थाः स्व स्व दृष्ट्या सृष्टेरारम्भादेव संनद्धाः सन्ति, तु वैज्ञानिकदृष्ट्यापि सङ्युक्तराष्ट्रसचे सम्मिलिताः देशाः पर्यावरण-सुरक्षार्थं बहूपायान् कुर्वन्तः सन्ति। यथा वयं जानीमः यत् पृथ्व्यप्तेजोवय्वाकाशानां पञ्चमहाभूतानां पञ्चीकृतसम्मिश्रणेन ब्रह्माण्डस्यास्य निर्मितिर्जाता, अतः पृव्यप्तेजोवाय्वाकाशान्येव पञ्च-महाभूतानि तथा तज्जन्यान्यपि र्यावरणशब्देन गृह्यन्ते। अतः एषां उपुर्यक्तानां पञ्चमहाभूतानां संरक्षणेन पर्यावरणसंरक्षां कर्तुं शक्यते। इदमेव कारणं यत् भारतीयमनीषा पृथिवीजलतेजो वायुगगनादिभिः सहैव नदीभूधरवनवृक्षवनस्पतिसर्पादिर्हिंसकजीवानामपि पूजनं सास्था करोति। वेदेषु षिभिः प्रायेण उपर्युक्तानां सुक्तादिमाध्यमेन स्तुतीः चक्रुः। तेषां विस्तरेण कथनमत्रगुरुतां यास्यति। संक्षेपतः पृथिवी पर्जन्याग्निनद्यानां स्तवनं वेदे पदे- पदे प्राप्यते।

यथा-

क. यत ते मध्यं पृथिविनभ्यम्।

ख. अग्निमीडे पुरोहितम् ।

ग. अच्छा वद तवसं गोभिराभिः।

घ. सह वामेन म उषः।

ङ. यदङ्ङ्ग त्वा भरता।

गभ्भीरतया पर्यावरणविषये विचारे कृते सहसा स्मृतिपटले अस्यानेके भेदोपभेदाः घटकाः मनष्यायान्ति। यथा- आर्थिकं राजनैतिकं सामजिकं प्राकृतिकं आध्यात्मिकं चेति पर्यावरणभेदाः भवितुं शक्नुवन्ति। यथा यत् वयं जानीमः-अखण्डसच्चिदानन्द-परब्रह्मपरमात्मनो हैतुकीकृपया प्रकृतेर्महत्तत्वं तस्मादहङ्कारः ततः षोडशकोगणः तस्मात् षोडशकात् पञ्चतन्मात्राभ्यः पञ्चमहाभूतानि तेषां पञ्चमहाभूतानां पञ्चीकृतसम्मिश्रणजन्यचतुर्धासृष्टिषु सर्वगुण-सम्पन्ना मानवजातिः विधातुः सर्वोत्कृष्टश कृतिरस्ति। अतः ब्रह्माण्डस्य समस्तघटकेषु सन्तुलनस्थापनं मनुष्याणामेव दायित्वमस्ति ।

यथा-

क. प्रकृतेर्महाँस्ततो हंकारस्तस्माद्गुणश्च षोडशकः ।

ख. द्विधाविधायचैकैकम्।

ग. जरायुजाण्डजोद्भिज्ज।

आर्थिकपर्यावरणे नेदं तात्पर्यमस्ति यत् समाजस्य प्रत्येकजनः आर्थिकदृष्टया समानतया सक्षमः सबलश्च स्यात्, तात्पर्य यत् समाजस्य सर्वाग्रिमाज्जनात् समाजस्य सर्वेभ्यः पृष्ठजनाय साम्यतया भोजनावासवस्त्रैः सहैव शिक्षास्वास्थ्यसेवादिसुविधा - समानरूपेण सर्वेभ्यः निरन्तरं मिलेत् चेत्, तु सामाजिकैकरूपताकारणात् समाजे न काचित् विसङ्गतिः भविष्यति। मन्येहं आर्थिकपर्यावरणसमाधाने राजनैतिकपर्यावरणस्य महतीभूमिका अस्ति। यदि राजनैतिकदलाः जातिवादात्, धर्मवादात्, क्षेत्रवादात्, भाषावादात्, रङ्गवादात्, लिङ्ङ्गवादात् च उपर्युत्थाय राष्ट्रभावनया वसुधैवकुटुम्बकं विश्वबन्धुत्वं चाङ्गीकृत्य सर्वेभ्यः तन्मे मनः शिवसङ्कल्पमस्तु इति भावनया कार्य कुर्युः तर्हि राजनैतिकपर्यावरणेपि साम्ये वर्तिष्यते। आर्थिकराजनैतिकपर्यावरणयोः सन्तुलने जाते सामाजिक पर्यावरणस्य जातिधर्मवादादिनिवारणपुरःसरं स्वत एव निर्वर्तनं यास्यति। यतोहि समाजस्य प्रत्येकोजनः शिक्षास्वास्थ्यसेवाभिः युक्तोभवन् जातिधर्मादिवादेभ्यः राहित्यकारणात् परस्परं द्वेषेष्यादिपरित्यागपूर्वकं समाजे सात्विकतानिर्माण स्वकर्तव्यानि सम्यक्तया निर्वहन् समतामुलकसमाजं कपालकल्पनया सार्थक रूपं प्रदाष्यति इति मे मननमस्ति। तथा यत्, आर्थिक राजनैतिक सामाजिकपर्यावरणानां शोधनपूर्वकं सुदृढतया सन्तुलिते जाते उपर्युक्तानां समस्तानां पर्यावरणानां स्वत एव निदानं सम्भवमस्ति। अ एव अस्माकं षिमहर्ष्याचार्याः पर्यावरणसन्तुलनार्थं आध्यात्मिक-पर्यावरणे सामञ्जस्थ संस्थाप्यतन्माध्यमेनैव भौतिकपर्यावरणे सन्तुलनं संस्थापनार्थं आध्यात्मिकपर्यावरण शुद्ध्यर्थं विशेषतया ध्यानं प्रदुः ।

यथा-

क. एकैव मानुषी जातिः।

ख. ख. सर्वे भवन्तु सुखिनः।

ग. त्रिविधं नरकस्येदं द्वारम्।

घ. तन्मेमनः शिवसङ्कल्पमस्तु।

इतिहासोत्रसाक्ष्यस्ति यत् अङ्गवादाधारे महाभारतस्य युद्धमभूत् तु रङ्गवादाधारे कृष्टिमतानुयायिनः सम्पूर्ण भूमण्डले स्व वर्चस्वं

स्थापितवन्तः । अनेनैव प्रकारेण जिहाद एवं मजहब इत्येतयोराधारे सम्पूर्ण विश्व आतंकवादात्भीतोस्ति। एवमेव जात्या-धारितारक्षण-याचनाकारणादेव गुजरातहरियाणाप्रदेशयोः विशिष्ट-जातिभ्याम् यत् ताण्डवनृत्यं कृतं तस्मात् कः अपरिचितोस्ति ? किन्तु एतेषां सर्वेषामपि अग्रेबधित्वा अद्य राष्ट्राणां समक्षे पर्यावरणस्य समस्यास्ति, या वैशवीकरणस्य उदारीकरणस्य चोपभोक्तृ-संस्कारेङ्गीकारे कृते न केवलं मानवानां कृते एव अपितु समस्त दृश्यादृश्य प्राणिनां समक्षे जीवनसंकटरूपेण नरिनर्ति। पर्यावरणक्षतिपरिणामसाकाररूपं विगतेषु केषुचित् वर्षेषु अस्माभिः काश्मीरे चोत्तराखण्डे दृष्टम्। तथास्माभिः ताभ्यामपि पूर्व सुनामीति झंझावातमाध्यमेन सहस्रतोप्यधिकाजनाः कालकवलीभूताः अनुभूताः। तत्प्राकृ - तिकसंसाधनैः सहानर्गलक्रीडायाः जीवन्तमुदा-हरणमस्ति।

प्राचीनभारतीय वाङ्मये सर्वदा आध्यात्मिकविकासे एव ऋषयः प्रायेण स्वध्यानं केन्द्रितं चक्रुः। आध्यात्मिकविकासस्य तात्पर्य आध्यात्यिकपर्यावरणसन्तुल्ने नैवास्ति, मानवाः स्वान्तः प्रोषित कामक्रोधलोभादि शत्रुषु निवसत्सु स्वाध्यात्मिकं विकासं न कर्तुं शक्नुवन्ति। मनषः शमनपूर्वकं इन्द्रियाणि सन्त्रियम्यैव मानवः कल्याणं प्राप्तं शक्नोति । वयं जानीमः यत् मानवशरीरः वाह्यतः एकः दृष्टिगोचरीभवन्नपि बौधिकभौतिकविशिष्टत्तत्वैः विनिर्माणवसात् एकस्मिन्नेवाधिकरणे द्वेशरीरे वर्तते। तत्र महत्तत्त्वाहङ्कारै कादशेन्द्रियाणि स्वविषयैः सह बौधिकशरीरमभिहितः तथा विषयरूपपञ्चतन्मात्राजन्यपञ्चमहाभूतानां पञ्चात्मकत्वेन निर्मितं भौतिकशरीरमभिदधाति अनयोबौधिकभौतिकयोर्मध्ये अन्योन्या-श्रयत्वं समवायसम्बन्ध श्चेति
दरिदृश्यते।
यथा-
क. ध्यायतो विषयान्पुंसः।
ख. प्रशांतचित्ताय जितेन्द्रियाय।
ग. सांसिद्धिकाश्च भावाः।

सारांश रूपेण इदं कथितुं शक्यते यत् सम्पूर्ण वैदिकवाङ्मयं पर्यावरणसुरक्षा मयमेवास्ति। यथा वयं जानीमः यत् सम्पूर्ण बह्माण्डस्य निर्मितिः पञ्चतन्मात्राभ्योजन्यपञ्चमहाभूतानां पृथिव्यप्ते-जोवायवाकाशानां पञ्चीकृतसम्मिश्रणेन जाता। द्रष्टुमपिशक्यते यत् इन्द्रः वृत्रासुर नियन्त्रणाज्जलं मोचयितुं तदसुरं जघान यथा-

**इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि बज्री।**
**अहन्नहिमन्नपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् ।।**

एवमेव गीतोपनिषदः प्रथमे मन्त्रेपि पर्यावरणसूचकक्षेत्रशब्दस्य प्रयोगः धर्मक्षेत्रे कुरुक्षेत्रे इति, अत्र पर्यावरणचर्चा महर्षि व्यासेन कृता। एवमेव पर्यावरणसुरक्षा विषयकं चिन्तनं प्रायेण सम्पूर्ण वैदिक वाङ्मये पदेपदेऽवलोक्यते। यथा अग्निसूक्तं, पर्जन्यसूक्तं, नद्यसूक्तं, सूर्यसूक्तं, उषस्सूक्तं, पृथिवीसूक्तं चेत्यादि पर्यावरणवाचीनिसुक्तानि रचित्वा ऋषिभिः पर्यावरणस्य प्रायेण पञ्चभूतानां मौलिकतत्वानां महत्वं प्रतिपादितमिति शम्।

**संदर्भसूची –**


१. पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्। (मनुस्मृति 12/94)
२. ब्राह्मणेन निष्कारणो धर्मः षडङ्गोवेदोध्येयोज्ञेयष्व।
(पातञ्जलमहाभाष्येपस्पषाह्निकान्तर्गतं)
३. अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम् ।।
(ऋग्वेद 1/1/1)
४. यत ते मध्यं पृथिवि नभ्यं नव्यं यास्त ऊर्जस्तन्नः असंबभबुः। तासु नो धेह्यभि न : पवस्त माता भूमिः पुत्रो अहं पृथिव्याः। पर्जन्यः पिता उ नः पिपतु ।। (अथर्ववेदः 12/1/12)
५. अच्छा वद तवसं गोभिराभिः स्तुहि पर्जन्यं नमसा विवास।
कनिकदृषभो जीरदान रतो दधात्योषधीषु गर्भम्।। (ऋग्वेद : 5/83/1)
६. सह वामेन न उषो व्युच्छा दुहितर्दिवः।
सह द्युम्नेन बृहता विभावरि राया देवि दास्वती ।। (ऋग्वेदः 1/48/1)
७. यदङ्ग त्वा भरताः संतरेयुर्गव्यन्ग्राम इषित इन्द्रजूतः। अर्षादह प्रसवः सर्गतक्तआ वो वृणे सुमति यज्ञियानाम्।। (ऋग्वेद: 3/33/11)
८. प्रकृतेर्महाँस्ततोहंकार स्तस्माद्गणश्च षोडशकः ।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि ।। (ईश्वरकृष्णः सां.का.सं. 22)
९. द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः।
(श्रीसदानन्दः वेदान्तसारः पृ०सं० 81)
१०.चतुर्विधशरीराणि तु जरायुजाण्डजोद्भिज्जस्वेदजाख्यानि।
(श्रीसदानन्दः वेदान्तसारः पृ०सं० 83)
११. एकैव मानुषीजातिः । (जनश्रुतिः)
१२. सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग् भवेत्।।
१३. त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामक्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।। (गीता 17/21)
१४. यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवेति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु।।
(अथर्ववेदः अ034 क० उ. मं. 1)
१५. ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।
सङ्गात्सञ्जायते कामः कामात्क्रोधोभिजायते ।। गीता 2/22)
१६. प्रशान्तचित्ताय जितेन्द्रियाय च, प्रहीणदोषाय यथोक्तकारिणे।
(वेदान्तसारः पृ०सं.43)
१७. सांसिद्धिकाश्च भावाः प्राकृतिका वैकृताश्च धार्माद्याः ।
दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः।।
(ईश्वरकृष्णः सां०का.सं. 43)
१८. इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि बज्री।
अहन्नहिमन्नपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् ।।
(ऋग्वेद 1.32.1)
१९. अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वजै स्वयै ततक्ष। वाश्रा इव धनवः स्यन्दमाना अञ्जः समुद्रमव जग्मुरापः ।। (ऋग्वेद 1.32.2)
२०. धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्यं ।। (गीता 1.1)